© 2018 IJSRSET | Volume 4 | Issue 7 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# शिक्षायाः कार्यम्

# [ Function of Education ]



त्रिलोकीनाथ मिश्र
शोधच्छात्र
राष्ट्रीय संस्कृतसंस्थान,
मुम्बई परिसर

मनुष्यः सामाजिकप्राणी वर्तते । समाजे वसति, स्थापनं कुर्वन् जीवति, इत्यतः सामाजिकगतिविधिना सह सम्बन्धं स्थापयितुं यत्नं करोति । सामाजिकपुरोगत्यै सर्वदा चिन्तयति । सामाजिकपुनर्रचनायां संकल्पमाचरति । अस्मिन् प्रसङ्गे सः शिक्षायाः साहाय्यं स्वीकरोति, यतः शिक्षायाः कार्यं मानवजीवननिर्माणार्थं राष्ट्रनिर्माणार्थं च भवति । शिक्षायाः कार्यम् इति प्रसङगे जान डी.वी. महोदयः अभिप्रैति- "असहायकानां सन्तोषप्रदनैतिक-समर्थनप्रदानम्, सुमानवरूपेण तेषां पुरोगतिसम्पादनं च"।

"The function of education is to help the growing of helpless young animal into a happy, moral and efficient human being." - John Dewey.

"शिक्षार्थिनां कृते स्वजीविकासम्पादनं शिक्षायाः अन्यतमं कार्यमिति मनुते ।"

डॉ.राधाकृष्णन् महोदयः

"To help the students to earn a living is one of the functions of Education."

Dr.S.Radhakrishnan

मानवजीवने शिक्षायाः कार्याणि [Function of Education in life]

सुनागरिकनिर्माणम् [Creation of good Citizens]

शिक्षायाः प्रथमं कार्यं भवति सुनागरिकनिर्माणम् । Cowthorn महोदयः वदति यत् शिक्षा मनुष्यस्य निर्माणं करोति इति [Education makes the man] अद्य अस्माकं देशः धर्मनिरपेक्षः प्रजातन्त्रः सञ्जातः । अतः इदम् अपेक्ष्यते यत् शिक्षया छात्राणाम् उत्तमविचारः, अनुशासनं, सहनशीलता, सहयोगः, देशप्रेम च इत्यादि गुणानां विकासः स्यात् । एकदा राष्ट्रम् उद्बोधयन् भूतपूर्वराष्ट्पतिः डॉ.- सर्वपल्ली-राधाकृष्णन् महोदयः इत्थं जगाद- कल्याणकारिदेशे अस्माकम् उद्देश्यं केवलम् एवं न भवेत्, यत् सर्वेषां नागरिकाणां भोजनवस्त्रवासादि प्रारम्भिकावश्यकवस्तूनां पूर्तिः भवतु, अपितु ते वसुधैवकुटुम्बकत्व भावनया समाजे सम्पर्कं स्थापयेयुः । यद्यपि ते विभिन्नप्रजातिधर्मप्रान्तसम्बद्धाः भवन्ति, तथापि सुनागरिकत्वसम्पादनार्थम् एषः मार्गः अनुसर्तव्यः। तत्र शिक्षा नृपस्थानमधिरुह्य तिष्ठति इति ।

व्यक्तित्त्व विकासः[Development of Personality]

शिक्षायाः कार्यं छात्राणां व्यक्तित्वस्य सर्वाङ्गीणविकासः । फ्रेडरिक्ट्रेसी महोदयानुसारं सम्पूर्णशिक्षायाः वास्तविकोद्देश्यं भवति पूर्णादर्शत्वप्राप्तिः, तच्च सन्तुलितव्यक्तित्वेनैव सेत्स्यति। एतत् सर्वं शिक्षा सम्पादयति इति।

आवश्यकतायाः पूर्तिः [Satisfaction of Need]

सम्प्रति समाजे आवश्यकतायाः पूर्तिः शिक्षायाः मुख्योद्देश्यम् अस्ति । जीवनयापनार्थं भोजनम्, आवासः, वस्त्रञ्च अत्यावश्यकं वस्तु भवति मानवस्य । विवेकानन्दमहोदयैरपि उक्तमासीत् यत् – "I want that education which give some food after education". अर्थात् अहं तादृशीं शिक्षां वाञ्छामि या शिक्षाप्राप्त्यानन्तरं उदरपूर्तिं कुर्यात् ।

एवञ्च सुभाषितकारोऽपि कथयति यत्-

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।

पात्रत्वात् धनमाप्नोति धनात् धर्मः ततः सुखम्॥ सुभाषित.

जीवनार्थं सन्नद्धीकरणम[Preparation for life]

विलमाट् महोदयानुसारम् 'शिक्षा जीवनस्य सन्नद्धीकरणं भवति।'

"Education is the apprenticeship of life"-Willmott

एवञ्च शिक्षायाः कार्यं भवति यत् छात्राणां जीवनसन्नद्धीकरणम्। भाविजीवने आगम्यमानानां समस्यानां दूरीकरणार्थं छात्राः सन्नद्धाः भवेयुः।

मूलप्रवृत्तीनां नियन्त्रम् [Control of Redirection]

प्रसिद्धमनोवैज्ञानिकाः ड्रेवर, वुडवर्थ, तथा थार्नडाइक महोदयाः यद्यपि मूलप्रवृत्तीनां वर्गीकरणविषये चर्चां कृतवन्तः तथापि मैकडूगल(McDougall) महोदयानां मतेन चतुर्दशमूलप्रवृत्तयः शिक्षाक्षेत्रे मूलभूताः राजन्ते इति। ते तावत् पलायनम्, युयुत्सा, निवृत्तिः, रक्षा, संवेदना, कामः, जिज्ञासा, आत्महीनता, आत्मप्रदर्शनम्, सामूहिकता, भोजनान्वेषणम्, संचयः, रचना, हासञ्च। शिक्षायाः कार्यं भवति यत् एतेषां मूलप्रवृत्तीनां नियन्त्रणं कृत्वा सदुपयोगाय कार्यकरणम् । यदि एतेषां लोभ-मोह क्रोधादीनां नियन्त्रणं न क्रियते तर्हि प्राणहानिः भवति । अतः भगवद्गीतायाम् उक्तमस्ति-

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।

स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥ (भ.गीता २.६३)

जन्मजातशक्तीनां प्रगतिशीलविकासः[Progressive development of innate powers]-

बालकस्य काश्चन जन्मजातशक्तयः भवन्ति । ताः यथा – प्रेम, आत्मगौरवम्, तर्कः, कल्पना, चिन्तनम्, मोहः, हासः, घृणा इत्यादयाः। शिक्षायाः कार्यं भवति यत् एतासां शक्तीनां विकासं कृत्वा सदुपयोगाय कार्यकरणम्। यथा ईश्वरभक्त्यर्थं ईश्वरे श्रद्धा भवेत्। अशिष्टकार्यात् घृणा जायेत्। सामाजिकपुरोगत्यर्थं चिन्तनं भवेत् इत्यादि।

आत्मनिर्भरतायाः प्राप्तिः [Achievement of Self-sufficiency]

शिक्षायाः कार्यं भवति यत् व्यक्तेः आत्मनिर्भरतासम्पादनम् । भूतपूर्वप्रधानमन्त्री श्रीमान् अटलबिहारिवाजपेयी महोदयः जनसमाजम् उद्बोधयन् उक्तवान्यत् सर्वकारीयोद्योगार्थं किमर्थं कोलाहलः? उद्योगः नास्ति । शिक्षां प्राप्य स्वीयसमस्यां स्वयं दूरीकुर्वन्तु । शिक्षा तु आत्मनिर्भरता प्राप्त्यर्थं दीयते, न तु उद्योगार्थम् इति ।

राष्ट्रीयजीवने शिक्षायाः कार्याणि [Function of Education in life]

भूभागं राष्ट्रस्य शरीरं भवति तथा प्राणाः भवन्ति तत्रत्यजनाः । जनानां (नागरिकाणां) जयाजययोः सुखदुःखयोः च निहिता भवति राष्ट्रस्योन्नतिः अवनतिः वा । उक्तञ्च मैकाइवर (Macaiver) महोदयैः – “The quality of the nation is the quality of the social unit whose common life, it is the fuel is poor. How can the flame be bright?” इति ।

राष्ट्रियविकासः [National development]

शिक्षया राष्ट्रियविकासः सम्भवति । शिक्षया जनसमाजे राष्ट्रियभावना जागरणीया । राष्ट्रभावना सा भावना या मानवं राष्ट्रियविकासार्थं प्रेरयति, स्वदेशाभिमानं स्वदेशगौरवञ्च प्राणेभ्योऽप्यधिकं भावयति । डेनियलबेवस्टर महोदयानुसारं –

“Let our education object be, our country, our whole country, and nothing but our country.”

राष्ट्रियविकासे शिक्षायाः कार्यं कियदस्ति इति विषये शिक्षाऽऽयोगः (1964-66) वदति – भारतस्य भाग्यनिर्माणं सम्प्रति कक्ष्यायामेव भवति । अस्माकं विद्यालयेषु विश्वविद्यालयेषु निर्मिताः छात्राः राष्ट्रस्योन्नतिं न कुर्वन्तीति । इयं भावना सुतरामयुक्ता कारणम् अस्माकं शिक्षाव्यवस्थायाः लक्ष्यमपि विद्यते यत् राष्ट्रियविकासः इति ।

राष्ट्रिय-एकता [National Integration]

भारतस्य ऐतिहासिकपरिशीलनेनएतत् सुस्पष्टं भवति अनैक्यताकारणेनैव भारतस्य हानिः बहुधा जाता । अस्मासु प्रान्तीयभावना,साम्प्रदायिकभावना, जातीयभावना, क्षेत्रीयभावना, भाषाः, कुलतत्त्वम्, मतकलहाः, पाक्षिकाभिप्रायाः, च सम्प्रत्यपि निहिताः वर्तन्ते । यावत् पर्यन्तम् एतासां भावनानां दूरीकरणं न क्रियते तावत् पर्यन्तं राष्ट्रियएकता-स्वप्नप्रायः भवति । अतः राष्ट्रिय-एकतार्थं “The question of integration covers in a sense almost everything in life above all, it covers education.”- Jawaharlal Nehru.

भावनात्मकैकता [Emotional Integration]

भारतदेशे बहुविधा अनेकता प्रतिभाति ते च परम्परागत- भाषागत- धर्मगत- रीतयः इत्यादयः । वयम् अस्माकं भाषापरम्परां स्वीकृत्य गर्वं कुर्मः, तस्य विषये भक्तिं च कुर्मः । इदं उत्तमं कार्यम् । एतत् न चिन्तनीयम् यत् इतरेषां भाषा असमीचीना, परम्पराः अस्वीकार्याः च इत्यादि । एतादृश्या भावनया अस्मासु भावनात्मकैकतायाः न्यूनता भवति, येन सम्पूर्णं भारतवर्षम् एकसूत्रे बद्धम् अक्षमाः भवामः । अतः तादृशीं भावनां त्यक्त्वा भावनात्मकैकता जागरणीया । अत्र च शिक्षायाः साहार्य्यं नितरां स्वीकरणीयम् । शिक्षया भावनात्मकैकता निर्मिता भवति । 1957 तमे वर्षे जवाहरलालनेहरू महोदयाः त्रिश्शूर वासिजनान् सम्बोधयन् जगाद – शिक्षायाः मुख्यं कार्यं भवति भावनात्मकैकता, अतः यत्र कुत्रापि अहं गच्छामि तत्र भारतस्य एकतायै वदामि । तत्र न केवलं राजनैतिकता, न वा सामाजिकैकता, परं भावनात्मकैकताऽपि अस्मासु स्यात् तच्च शिक्षाद्वारा जागरणीया इति ।

राष्ट्रियानुशासनम्  [National discipline]

शिक्षया राष्ट्रियानुशासनं संरक्षणीयम् ।एकोनसप्तति वर्षेभ्यः पूर्वं वयं  स्वाधीनतां प्राप्तवन्तः। प्राप्तं स्वातन्त्रयं संरक्षणीयं, स्वीयपरिश्रमेण निष्ठया च। राष्ट्रस्य विकासः तदा सम्भवति यदा अस्मासु आत्मोत्सर्गादिभावना जागरणीया। तच्च शिक्षया सेत्स्यति।

नेतृत्त्वनिमित्तं प्रशिक्षणम् [Training of Leadership]

लोकतन्त्रं तावत् पर्यन्तं सफलं न भवति, यावत् पर्यन्तं नागरिकाः स्वीय-कर्तव्यं   स्वयं कर्तुं समर्थाः न भवन्ति । नागरिकाणां कृते अनुशासनविषये नेतृत्वनिर्माणविषये च प्रशिक्षणमपेक्ष्यते। राष्ट्रियजीवने शिक्षायाः मुख्यं कार्यं भवति नागरिकेभ्यः उत्तमं प्रशिक्षणं दातव्यं येन ते सामाजिक–राजनेतिक–औद्योगिक–सांस्कृतिकक्षेत्रे नेतृत्वस्य कार्यं कुर्युः।